श्री आत्मानन्द-ग्रन्थमाला षट्त्रिंशत्तमं रत्नम् (३६)

श्री कनककुशलसंकलिता

॥ श्री रोहिणी-अशोकचंद्रकथा ॥

श्रेष्ठिदीपचंद्रगांडाभ्रातुस्सुपत्नी "मोतीबाइ" इत्यभिधानायाद्रव्यसाहाय्येन.
प्रकाशयित्री भावनगरस्था-श्री जैन आत्मानन्द सभा.
इदं पुस्तकं वल्लभदास त्रीभुवनदास गांधी सेक्रेटरी इत्यनेन प्रकाशितम्.
वीर संवत् २४४१ आत्म संवत् १९ विक्रम संवत् १९७१
'आनंद' मुद्रालयाधिपतिना शाहलल्लुभ्राभ्रात्मजेन गुलाबचंद्रेण मुद्रितम्.

36
KANAKAKUSALA
ROHINI-ASOKACANDRA
KATHA
1914
4069

PK 3701
.K21R6
1914

॥ अर्हम् ॥

॥ श्रीमद्विजयानन्दसूरीश्वरेभ्यो नमः ॥

॥ श्री रोहिणी-अशोकचन्द्रकथा. ॥

(श्री कनककुशलविरचिता.)

श्रीमान् पार्श्वजिनः सर्वा,-नीष्टसिद्धिविधायकः । जज्ञानां भूतये भूया,-त्तमालश्यामलद्युतिः ॥ १ ॥ कवीनां जननी नित्यं, पुस्तकन्यस्तहस्तका । मरालवाहना देवी, शारदा वरदास्तु मे ॥ २ ॥ नत्वा विद्यागुरुं प्राणि,-प्रतिबोधैकहेतवे । तपसि श्लाघिते सद्भिः, प्रोच्यते रोहिणीकथा ॥ ३ ॥ शक्यते तत्तपः कर्तुं, केनचिद्दोरचेतसा । वंजज्यते यदस्थीनि, मदमत्तोरुदंतिनः ॥ ४ ॥ यस्माज्जवंति विविधा, लब्धयश्चारुसिद्धयः । क्षयश्चाशेषपापानां, कः स्तवीति न तत्तपः ॥ ५ ॥ रूपं सौभाग्यसंयुक्तं, शरीरं व्याधिवर्जितं । सर्वत्र विस्तृता कीर्ति-स्त्रिजगज्जनमान्यता ॥ ६ ॥ ललना कमनीया च, सुताः सविनया धनं । इहेति निश्शेषजनै-र्गीयते तपसः फलं ॥ ७ ॥ युग्मं ॥ यतः—यद् दुरं यद् दुराराध्यं, यच्च दूरे व्यवस्थितं । तत्सर्वं तपसा साध्यं, तपो हि दुरतिक्रमं ॥ ८ ॥ प्रवर्त्तते यस्तपसि, शोकस्तस्य कदापि न । रोहिण्या इव विश्वेऽस्मिं-स्तत्कथाथ प्रतन्यते ॥ ९ ॥ जंबू-

649081

द्वीपस्य भरत-क्षेत्रे शस्यर्धिबंधुरे । अंगदेशोऽस्ति विख्यातो, देशानामादिमः क्षितौ ॥ १० ॥ ईतिनीतिविनिर्मुक्ता, सन्नीति-विहितोदया । तत्रासीद्विगताकंपा, चंपाख्या प्रवरा पुरी ॥ ११ ॥ श्रीवासुपूज्यतीर्थेश-तनयस्तत्र नीतिवित् । मघवाख्योऽभवद्राजा, प्रजापालनतत्परः ॥ १२ ॥ सदा सदाचारपरा, जनमान्या पतिव्रता । तस्याभवत् प्रिया नाम्ना, लक्ष्मीर्लक्ष्मीरिवांगिनी ॥ १३ ॥ तयोः सुतानामष्टाना-मुपर्येकाभवत्सुता । नाम्ना हि रोहिणी ख्याता, पित्रोरत्यंतवल्लभा ॥ १४ ॥ चतुःषष्टिकलापात्रं, रतिरूपा प्रियंवदा । नयमार्गरता चारु-लावण्यरसनिम्नगा ॥ १५ ॥ सारंगशावनयना, नयनानंददायिनी । स्त्रीजनेषु शिरोरत्नं, विज्ञानधनसेवधिः ॥ १६ ॥ स्त्रीजातित्वेन विहित-पक्षपाता गिरा किमु । चंचत्कांचनगौरांगी, तनुमध्या पिकस्वरा ॥१७॥ सर्व-स्यापि कुटुंबस्य, मान्याह्लादकरी च सा। स्तोकं हि वस्तु मिष्टं स्यादिति श्लोकोऽपि जायते ॥ १८ ॥ चतुर्भिः कलापकं ॥ शोभनं यौवनं प्राप्तां, तां सुतां वीक्ष्य भूमिपः । मघवाख्यश्चकारोच्चै-स्तत्स्वयंवरमंमपं ॥ १९ ॥ प्रेषयित्वा ततो दूता-नाहूतास्तेन भूरिशः। राजानो राजपुत्राश्च, रूपनिर्जितमन्मथाः ॥ २० ॥ अंगवंगकलिंगांध्रजालंधरमरुस्थलाः । लाटज्योटमहाज्योट, मेदपाटविराटकाः ॥ २१ ॥ गौरुचौरुमहाराष्ट्र, सौराष्ट्रकुरुगुर्जराः । आभीरकीरकाश्मीर, गोल्लपंचालमालवाः ॥ २२ ॥ हूणचीणमहाचीण, क-च्छकर्णाटकुंकणाः । सपादलक्षनेपाल-कन्यकुब्जककुंतलाः ॥ २३ ॥ मगधानिषधासिंधु, विदर्भेंद्रविदर्भेंद्रकाः । इत्याद्यनेकदेशेभ्य-स्तत्राजग्मुर्नृपोत्तमाः ॥ २४ ॥ ते सर्वे सुंदराकाराः, शृंगाररसमाजनं । मंचानुच्चानलंचक्रु-र्विमानानीव नाकिनः ॥ २५ ॥ शुभ्रेऽह्नि श्वेतवसना, स्नाता कृतविलेपना । महार्घभूषणधरा, कज्जलांकितलोचना ॥ २६ ॥ समग्रयूनां चित्तानि, सहसा पश्यतोहरा । अतिप्राज्ञसखीवर्गा-नुगता विकसन्मुखी ॥ २७ ॥ नृपाह्ववाहनारूढा, सुरीव धरणीगता । समागाद्रोहिणी कन्या

तं स्वयंवरमंमपं ॥ २८ ॥ त्रिभिर्विशेषकं ॥ भूपानां नामगोत्रेषु, विज्ञा विज्ञातमानसा । पुरोभूय जगादोच्चैर्वत्रिणी रोहिणीमाता ॥ २९ ॥ सिद्धप्रशस्यशस्यानां, मालवानामसौ प्रभुः । विवेकनयनैपुण्यपूर्णोऽयं गुर्जराधिपः ॥ ३० ॥ कदस्यादिफलास्वाद-विज्ञः कुंकणराडयं । शत्रुंजयाद्रिविभ्राजि-सौराष्ट्रभूपतिस्त्वयं ॥ ३१ ॥ अयं हि चित्रकूटाद्रि-विलसन्मेदपाटराट् । सद्भक्तं-वल्लोल्लासि-नेपालानामसौ पतिः ॥ ३२ ॥ प्रौढकोटिशिलाशाल्मिमगधानामसौ विभुः । अयमर्बुदतीर्थोद्य-न्मरुस्थलमहीपतिः ॥ ३३ ॥ असौ तु शारदापाद--न्यासकाश्मीरदेशराट् । अयं हि मत्तमातंगकलिंगविषयाधिपः ॥ ३४ ॥ असौ चारुगुणश्रेणी-वीतशोकनृपात्मजः । नाम्ना ह्यशोकचंद्राख्यो, भूपतिर्भूरिभूतिभृत् ॥ ३५ ॥ सपादलक्षदेशेशः, श्रीमन्नागपुरस्थितिः । युवा न्यायरतो धीमान्, विख्यातो भूतलेऽखिले ॥ ३६ ॥ युग्मं ॥ इत्याद्यखिलभूपेषु, यस्ते चेतसि रोचते । वरस्तमेव नो जल्पे, वृणु वीक्ष्य विशेषतः ॥ ३७ ॥ इति तद्वचनं श्रुत्वा, रोहिण्युत्फुल्ललोचना । प्रत्येकं भूपतीनुच्चै-वींक्षतेस्म दृशा स्वयं ॥ ३८ ॥ अ-न्यानशेषनृपाल्लान्, मुक्त्वा सा वरमालिकां । अशोकचंद्रभूपस्य, कंठे चिक्षेप दक्षहृत् ॥ ३९ ॥ कन्यापित्रा ततो भक्त्या, सत्कृता वसनादिभिः । विसृष्टाश्च नृपाः सर्वे, जग्मुः स्वान् विषयान् प्रति ॥ ४० ॥ मघवाख्यो महीभर्ता, शुभ्रलग्नेऽथ सोत्सवं । अशोकचंद्ररोहिण्यो-र्विवाहं विधिना व्यधात् ॥ ४१ ॥ आश्वीयं हास्तिकं चारु-भूषणानि मणीनपि । जामातुः श्वशुरः प्रादा-त्करमोचनपर्वणि ॥ ४२ ॥ अथाशोकनृपस्तत्र, परिणीय नृपांगजां । तस्थिवान् कतिचिद्दिवसान्, समोदं श्वशुराग्रहात् ॥ ४३ ॥ अन्येद्युर्जननी पुत्रीं, विनयावनतामवक् । प्रोच्यमानां मया भद्रे, हितशिक्षां शृणु ॥ ४४ ॥ पत्यौ प्रीतिमती रक्ता, भक्तौ देवेषु साधुषु । विरक्ता दर्शनेऽन्येषां, नृणां भूयाश्च रागतः ॥ ४५ ॥ पत्यादिभिः शिक्षिता त्वं, मा कार्षीः कर्हिचित्क्रुधं । दुःखे

MUTILATED IN ORIGINAL

सत्यपि दीनत्वं, विषादं च विशेषतः ॥४६॥ गुणेष्वेवादरः कार्यः, कज्ञानां शिक्षणे तथा । अर्हत्प्रणीतधर्मे च, विद्यायां विनये नये ॥४७॥ क्षमावती सुतवती, चूया: सतीमतल्लिका । शास्त्रोदितं वधूकृत्यं, कुर्याः सकल्पमादरात् ॥४८॥ तथाहि—शय्योत्पाटन-गेहमार्जनपयःपानिन्ध्यचुल्लीक्रिया—स्थाल्लीक्षाक्षनधान्यपेषणजिदो गोदोहतन्मंथने । पाकस्तत्परिवेषणं समुचितं पात्रादिशौच-क्रिया, श्वश्रूर्ज्ञतृननांदृदेवृविनयाः कृत्यानि वध्वा इति ॥ ४९ ॥ जनन्याजिहितां शिक्षां, प्रतिपेदे तथेति सा । हितैषिणा हि गुरुणा, शिष्यो विनयवानिव ॥ ५० ॥ अथ श्वशुरमापृच्छ्य, समादाय प्रियां निजां । अशोकचंद्रो नृपतिः, स्वपुरं सैन्ययुग्ययौ ॥ ५१ ॥ सहस्रनेत्रः शच्येव, रत्येव रतिवल्लभः । सार्धं दयितया भूपो, विलेभास यथासुखं ॥ ५२ ॥ क्रमाच्चतुष्कं पुत्रीणामष्टौ च प्रवराः सुताः । संजज्ञिरे हि रोहिण्याः, सुरूपाः शुभलक्षणाः ॥ ५३ ॥ सप्तभूमिकसत्सौध-गवाक्षस्थेन भूभृता । श्लोकपालाभिधः पुत्रो—ऽन्यदोत्संगे निवेशितः ॥ ५४ ॥ तस्मिन्नवसरे काचि-दत्यासन्नगृहस्थिता । मृतस्वपुत्रदुःखेन, रुरोद भृशमंगना ॥ ५५ ॥ महीज्ञर्तुः समीपस्था, राज्ञी श्रीरोहिणी तदा । तां स्त्रियं रुदतीं वीक्ष्य, प्रोचे प्राणप्रियं निजं ॥ ५६ ॥ कं हि रागं करोत्येषा, षट्सु रागेषु धीमती । चित्रकृन्नाटकं किं वा, विचित्राभिनयान्वितं ॥ ५७ ॥ स्मित्वा मनाग्महीपाल:, स्वप्रियामवदच्छुभे । इदं हि रोदनं श्लोके, को न जानाति देहभृत् ॥५८॥ रोदनं हसनं कामक्रीडा जृम्भणमीक्षणं । गमनं शयनं निद्रा स्वयं सिध्यन्यभूमि हि ॥५९॥ अपुण्ययोगाज्जंतूनां, जायंते धनहानयः । अनिष्टयोगा इष्टानां, वियोगाश्चाधयो रुजः ॥ ६० ॥ ततः स्याद् दुःसहं दुःखं, स्यात्ततो रोदनोद्भमः । संज्ञवेत्तत्क्षणादेव, स तु स्त्रीणां विशेषतः ॥ ६१ ॥ युग्मं ॥ त्वं तु गर्ववशादेवं, ब्रवीषि सुखिनी सती, न दुःख्यत्युदरं पार्श्वं. यस्य तस्यैति च स्मितं ॥ ६२ ॥ इति भर्तुर्वचः श्रुत्वा, स्यादं किंचि

॥ २ ॥

राहिणी। इदं हि रोदनं नाथ, मम नायाति सर्वथा ॥ ६३ ॥ नास्ति मे मानसे गर्वो राज्यैश्वर्यसुखोद्भवः । न चापि हास्यवचन-मनर्हं वदनांबुजे ॥ ६४ ॥ ततो वसुमतीपालो, वभाण निजवल्लभां । वामोरु सांप्रतं पश्य, रोदनं शिक्षयामि ते ॥ ६५ ॥ इत्यु-क्त्वा श्लोकपालाख्य-मुत्संगात्स्वीयमंगजं । कराभ्यां सहसोत्पाट्याधस्ताच्चिक्षेप भूपतिः ॥ ६६ ॥ तदा हाहारवश्चक्रे, राज्ञः पार्श्व-स्थितैर्नरैः । भवेद् दुःखं न केषां हि, महतां विपदागमे ॥ ६७ ॥ चलन्करादयं सूनुः, पतितो हेति भूधवः । जगौ तथापि रो-हिण्या, नाभूद् दुःखं न रोदनं ॥ ६८ ॥ तावत्पतंतं तं बालं गृहीत्वा पुरदेवता । सिंहासने सुमोचाधः—स्थिते स्वयं विनिर्मिते ॥ ६९ ॥ राज्ञादिष्टा नरास्तस्मात्, स्थानादुत्तीर्य सत्वरं । ददृशुर्विस्मयंतं तं, हसंतं शिशुमुच्चकैः ॥७०॥ निवृत्त्य हर्षिताश्चेऽथ, संयोजितकरद्वयाः । राज्ञो विज्ञपयामासु-र्नंदनक्षेममुत्सुकाः ॥ ७१ ॥ तत्स्वरूपं शिशोर्वीक्ष्य, विस्मिताः सौवचेतसि । अहो पुण्यमहो पुण्य,—मिति सर्वे जगुर्जनाः ॥ ७२ ॥ यतः—पुण्यैः संज्ञाव्यते पुंसा—मसंज्ञाव्यमपि क्षितौ । तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ॥ ७३ ॥ वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षंति पुण्यानि पुराकृतानि ॥ ७४ ॥ धन्येयं रोहिणी रामा या न जानाति रोदितुं । सर्वत्र प्रपथे तस्या, इति श्लाघा जने हिता ॥७५॥ अन्यदा श्रीवासुपूज्य,—जिनशिष्यौ महामुनी । रूप्यकुंजस्वर्णकुंज,—नामानावागताविह ॥ ७६ ॥ तयोरागमनं श्रुत्वा, गत्वा च सपरिच्छदः । नत्वा तौ मेदिनीपालो, निषसाद यथाविधि ॥ ७७ ॥ चतुर्ज्ञानधरो धीरो, रूप्यकुंजाभिधो मुनिः । प्रददौ देशनां सम्यग्, जनानां हितकाम्यया ॥ ७८ ॥ तद्यथा— अस्थिरेण शरीरेण, स्थिरं धर्मं समाचरेत् । प्रायेण खलु यास्यंति, प्राणाः प्राघूर्णका इव ॥ ७९ ॥ धर्मो दुष्कर्मघर्मौघ,—तापनिर्वापणौषधं । साध्यते वपुषानेन, कूपकेनेव शर्करा ॥ ८० ॥ नमस्कारं हारं

वहत हृदये कर्णयुगले, श्रुतं ताटंकाद्यं करकुवलयोर्दानवलयं । गुरोराज्ञां शीर्षे मुकुटमतुलं येन नविकाः, स्वयं युष्मत्कंठे क्षिपति वरमाल्यां शिववधूः ॥ ८१ इत्यादिदेशनान्ते गुरुं पप्रच्छ नृपतिः। दुःखं न वेत्ति नगवन, रोहिणी रोदनादिकं ॥ ८२ ॥ अनया किं कृतं सम्यक्, पुण्यं प्राचीनजन्मनि । कथ्यतां विस्मयकरं, विधाय करुणां मयि ॥ ८३ ॥ गुरुरूचेऽत्रैव पुरे, धनमित्रोऽनवद्धनी । तस्यासीत्सुंदरी नार्या ॥ वासवस्य शची यथा ॥ ८४ ॥ तयोर्बभूव तनया, कुरूपाधिकदुर्नगा । दुर्गंधा कज्जल-श्यामा, नाम्ना काक्षीति विश्रुता ॥ ८५ ॥ सा यौवनवती पित्रा, दत्ता रंकस्य कस्यचित् । धनकोट्या समं सोऽपि, परं नेच्छति तां खलु ॥ ८६ ॥ अन्यदा धनमित्रः स, चौरं श्रीषेणनामकं । मार्यमाणं मोचयित्वा, नीत्वौकसि तमब्रवीत् ॥ ८७ ॥ नो नऊ मद्गृहे तिष्ठ, दत्तेयं ते मया सुता । सुखं क्रीडव गृहाणाशु, वस्त्राण्याभरणानि च ॥ ८८ ॥ तथेति प्रतिपद्यासौ, स्थितः श्रेष्ठी-शवेश्मनि । नोजितश्चारुपक्वान्नैः, स्वश्वा विविधव्यंजनैः ॥ ८९ ॥ अथ सुष्वाप पल्यंके, निशायां स तया सह । क्षणात्तद्देह-दुर्गंधा,—न्नष्ट्वा स प्रययौ क्वचित् ॥ ९० ॥ तं नष्टं तत्पिता ज्ञात्वा,—न्यधादेवं निजां सुतां । दीनादिभ्यः सदा दानं, देहि सर्वसुखप्रदं ॥ ९१ ॥ साऽज्ञां पितुः प्रपद्याभू,—द्दानं दातुमशोद्यता । दुर्गंधायाः करात्तस्याः कोऽप्यन्नं नो जग्रहौ परं ॥ ९२ ॥ ततोऽतिदुःखिनी दीना, तस्थौ सा रुदती भृशं । अनुक्तं सत्कथं कर्म, क्षयं याति हि देहिनां ॥ ९३ ॥ यतः— नानुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि । अवश्यमेव नोक्तव्यं, कृतं कर्म शुभाशुभं ॥ ९४ ॥ अन्यदा तत्पुरोद्याने, गुरु-र्ज्ञानी समागमत् । धनमित्रादिभिः श्रेष्ठी, तद्वंदनकृते ययौ ॥ ९५ ॥ गुरुं प्रणम्य विधिना, श्रुत्वा धर्मस्य देशनां । पुत्र्याः पूर्व-भवं श्रेष्ठी, पप्रच्छ रचितांजलिः ॥ ९६ ॥ उवाच गुरुरप्येवं,—मत्रैव भरतेऽनवत् । पुरं गिरिपुरं नाम, श्रिया स्वःपुरसन्निभं

॥ ३ ॥

॥ ९७ ॥ तत्रासीन्न्यायनिरतः , पृथ्वीपाद्मानिधो नृपः । तस्य सिद्धिमती राज्ञी, बभूवात्यंतवल्लभा ॥ ९८ ॥ ययावन्यद्युरुद्यान क्रीडितुं सप्रियो नृपः । तदा चैद्धिष्ट जिज्ञायै, मुनिमायातमुत्तमं ॥ ९९ ॥ ध्यायतिस्मेति नृपतिः , साधुरेष गुणाकरः । महा-तीर्थं पुण्यपात्रं, कर्मक्षयसमुद्यतः ॥ १०० ॥ यतः— साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः । तीर्थं फलति कालेन, सद्यः साधुसमागमः ॥ १ ॥ तदस्मै साधुवर्याय, निःस्पृहाय वपुष्यपि । शुद्धान्नपानयोर्दानं, फलाय महते नवेत् ॥ २ ॥ यतः—" दान-मौचित्यविज्ञानं, सत्पात्राणां परिग्रहः । सुकृतं सप्रभुत्वं च, पंच प्रतिभुवः श्रियः ॥ ३ ॥ ध्यात्वेति नृपतिः स्माह, स्वप्रियां प्रेमसंभृतां । अस्मै वन्दित्वा मुनये,दानं देहि वरानने ॥ ४ ॥ प्रपद्य तद्वचः पत्यु,—रेषा बहिःप्रमोदभाक् । क्रीडांतरायाद्दु-ष्टांत,—र्ववन्दे स्वगृहंप्रति ॥५॥ गत्वा सा स्वगृहं तस्मै, साधवे कटुतुंबकं । प्रद्वेषपूरिता प्रादात्, प्रविष्टाः किं न कुर्वते ॥ ६ ॥ मुनिः कृत्वा तमाहारं, स्वांत्यावस्थां विज्ञाप्य च । विधायाऽनशनं सम्यग्, जगाम त्रिदशालयं ॥ ७ ॥ विज्ञाय तन्महीपालः, सर्वं व्यतिकरं क्रुधा । द्रुतं निष्कासयामास, तां राज्ञीं निजदेशतः ॥ ८ ॥ साऽन्नयत्तत्तप्ते घसे, वराकी कुष्ठिनी ततः । अत्युग्राणां हि पापाना,—मिहैव फलमाप्यते ॥ ९ ॥ यतः—चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे। संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥१०॥ चिरं जनैर्निंद्यमाना, ताड्यमाना पदे पदे । सा मृत्वा नरकं षष्ठं, जगामाघसमार्जितं ॥११॥ ततस्तिरश्चां सा योना,— वुत्पन्ना पूर्वकर्मतः । ततश्च दुःखप्रचुरे, सप्तमे नरके खलु ॥ १२ ॥ एवं हि प्रययौ पापा, सर्वेषु नरकेषु सा । नराणां पाप्मनां न स्या,—न्नरकादपरा गतिः ॥ १३ ॥ ततः सा सर्पिणी चोष्ट्री, शृगाली कुकुटी तथा । शूकरी गृहगोधा च, जलौका मूषिका पुनः ॥ १४ ॥ काकी शुनी बिडाली च, रासभी गौरजा तथा । प्रायोऽग्निशस्त्रघाताद्यै,—र्मृतिरेषु भवेष्वभूत् ॥ १५ ॥ युग्मं ॥

धेनुस्तु स्वांत्यसमये, नमस्कारं गुरूदितं । श्रुत्वानुमोदयामास, मृतिमाप च तत्क्षणात् ॥ १६ ॥ नमस्कारप्रभावेण, साभव-
त्तव नंदिनी । कर्मणा तेन दुर्गंधा, दुर्भगा च महामते ॥ १७ ॥ इति पूर्वभवोदंत,—माकर्ण्य गुरुणोदितं। शुभध्यानवशात्काली,
क्षेत्रे जातिस्मृतिं क्षणात् ॥ १८ ॥ दृष्ट्वा पूर्वभवानेषा, नीता मुनिमवोचत। एतस्माद्दुष्कृताद् भाग्यां, निस्तारय दयापर ॥१९॥
गुरुः प्रोवाच नो भद्रे, कुरु त्वं रोहिणीतपः । सप्तवर्षाणि सप्तैव, मासान् यावच्छुभाशया ॥ २० ॥ रोहिणीनामनक्षत्र,—दिने
हि क्रियतां त्वया । उपवासश्चार्हतोऽर्चा, वासुपूज्यस्य भक्तितः ॥ २१ ॥ एतत्तपःप्रभावाच्च,—मशोकचंद्रभूपतेः । भूत्वा राज्ञी
तपस्तप्त्वा, व्रजिष्यसि शिवं शुभे ॥ २२ ॥ तदा हि वासुपूज्यस्या,—र्हतस्तीर्थं भविष्यति । पावनं भव्यलो-
काना,—मीहितार्थसुरद्रुमं ॥ २३ ॥ रजताशोकवृक्षस्य, तलस्थे जिनसद्मनि । सुवर्णनिर्मिते वासु,—पूज्यस्य प्रतिमां
नवां ॥ २४ ॥ कारयित्वा रत्नमयीं, नानाभरणभूषितां । विधाय भद्रे सतत,—मधुना त्वं प्रपूजय ॥ २५ ॥ युग्मं ॥
तेन पुण्येन भो भद्रे, त्वं सुगंधा भविष्यसि । सुगंधभूपवद्भूरि,—पुण्यादिष्टं न किं भवेत् ॥ २६ ॥ सावदद्भगवन्
कोऽयं, सुगंधाख्यो महीपतिः । गुरुर्बभाण शृणते,—ऽस्त्यस्ति सिंहपुरं पुरं ॥ २७ ॥ सिंहसेनाभिधस्तत्र, भूपोऽभूद्भूरिविक्रमः ।
पत्न्यासीत्तस्य कनक,—प्रभा चारुप्रभान्विता ॥ २८ ॥ तयोर्बभूव तनयो, लोकानामप्रियोऽधिकं । दुर्गंधो दुर्भगो निंद्यो,
नाम्ना निर्नामकः स्मृतः ॥ २९ तेनान्यदा मुदावंदि, जिनः पद्मप्रभाभिधः । पृष्टश्च विनयात्पूर्व,—भवोऽथ प्रभुरप्यवक् ॥३०॥
बभूव श्रीनागपुरात्, पुराद् द्वादशयोजने । नीलवह्निरिरत्युच्चो, विशालवरगह्वरः ॥ ३१ ॥ तत्रैकः कुरुते साधु,—र्मासक्षपणमाद-
रात् । पूर्वकर्म क्षपयितुं, वरवैराग्यसागरः ॥ ३२ ॥ तदा तत्रागमद्व्याधः, पाणौ विधृतकार्मुकः । मृगादिजंतुजातानां,

हिंसायां विहितादरः ॥ ३३ ॥ मुनिप्रभावात्सव्याधः, स्वकृत्ये निष्फलोऽजनि । साधुर्जगाम ग्रामांत,—र्भिक्षायै
पारणाहनि ॥ ३४ ॥ कृत्वा पारणकं साधु,—स्तत्रागत्य शुभाशयः । कायोत्सर्गं चकारौच्चैः, शत्रुमित्रसमानदृक् ॥ ३५ ॥
व्याधः क्रुधा ज्वलन् साधु,—सन्निधाविंधनोत्करे । चिक्षेप वह्निं पापात्मा, किं ह्यकृत्यं दुरात्मनां ॥ ३६ ॥ व्यथां तपो-
भवां साधुः, सहमानः सुदुस्सहां । शुभध्यानवशात्प्राप्य, केवलं मुक्तिमासदत् ॥ ३७ ॥ व्याधोऽपि तेन पापेन, गलत्कुष्ठी
बभूव सः । तापार्दितः क्रमान्मृत्वा, सप्तमं नरकं ययौ ॥ ३८ ॥ ततो घूकस्ततश्चाद्ये, नरके नारकस्ततः । सर्पः पंचमनरके, नारकः
केसरी ततः ॥ ३९ ॥ चतुर्थे नरके नैर,—यिकस्ततश्च चित्रकः । श्येनस्तृतीयनरके नारको घूकपक्ष्यपि ॥ ४० ॥ ततश्चाद्ये हि
नरके, नारको दुःखपीडितः । ततो दरिद्रगोपाद्यः, सोऽभवत्कर्मयोगतः ॥ ४१ ॥ त्रिभिर्विशेषकं ॥ स गोपः काननेऽन्येद्यु,—
र्दवदग्धो गतः पुरे । श्राद्धदत्तनमस्कारो, मृतिमाप समाधिमान् ॥ ४२ ॥ नमस्कारस्य माहात्म्या त्त्व,—मभूर्नृपनंदनः शेषदुष्क-
र्मदोषेण, दुर्गंधश्च नरोत्तम ॥ ४३ ॥ श्रुत्वेत्यर्हद्वचस्तस्य, जातिस्मृतिरजायत । ततः सोऽवग् जिनं मां त्वं, निस्तारय दया-
बुधे ॥ ४४ ॥ अर्हन्नुवाच भो भद्र, कुरु त्वं रोहिणीतपः । सोऽपि प्रपद्यार्हद्वाक्यं, तच्चकार तपश्चिरं ॥ ४५ ॥ प्रभावात्तप-
सस्तस्य, दुर्गंधत्वमगादलं । सुगंधत्वमभूद्देहे, तपसा किं न सिध्यति ॥ ४६ ॥ सुगंध इति तस्यासी,—न्नामापि जगतीतले ।
लोकैः सर्वैः श्लाघितस्य, यशः पुण्यैरवाप्यते ॥ ४७ ॥ तथा ततःप्रभावेण, सुगंधा त्वं भविष्यसि । श्रुत्वेति सा गुरोर्वाक्यं, तथे-
ति प्रत्यपद्यत ॥ ४८ ॥ तत्तपो विधिना चक्रे, शर्मदं सा मनस्विनी । क्रमात्सुगंधा सुभगा जनमान्या च साभवत् ॥ ४९ ॥
मृत्वा समाधिना सांते, देवीभूता ततश्च्युता । चंपेशमघवपुत्री, संजाता तनयोत्तमा ॥ ५० ॥ सुरूपा रोहिणी नाम्ना,

सदा शोकविवर्जिता। तव राज्ञी महीपाल, बभूवेयं महासती ॥५१॥ पुनर्बज्ञाण ज्ञूपाल्लो, ज्ञगवन् कथ्यतां मम। अस्या मयि महान् स्नेहो, ममाप्यस्यां कुतो हि सः ॥ ५२ ॥ मुनिर्जगाद राजेंद्र, तन्निदानं वदाम्यहं। सावधानं मनः कृत्वा, शृणु श्रावकपुंगव ॥ ५३ ॥ सिंहसेनोऽथ नृपतिः, सुगंधाख्यं स्वनंदनं। राज्येऽज्ञिषिच्य सुगुरोः, पार्श्वे दीक्षां स्वयं ज्ञज्ञौ ॥ ५४ ॥ सुगंधरा-जापि चिर,—माराध्य जिनशासनं। प्रांते समाधिना मृत्वा, देवज्ञूयं समासदत् ॥ ५५ ॥ इतश्च जंबूद्वीपस्थ,—विदेहे सुखसज्ञनि विजये पुष्कज्ञावत्यां, नगरी पुंमरीकिणी ॥ ५६ ॥ तत्रासीन्मेदिनीपाल्लः, प्रजापाल्ननतत्परः। नाम्ना हि विमल्लकीर्ति, श्चारुकीर्तिर्महामतिः ॥ ५७ ॥ चारुज्ञद्रा सुभद्रेति, नाम्ना तस्य सधर्मिणी। सुशील्ला मंजुवचना, ल्लावण्यरसनिम्नगा ॥ ५८ ॥ स्वर्गात् सुगंधजीवो हि, च्युत्वा तत्कुक्षिकंदरे। चतुर्दशमहास्वप्न,—सूचितोऽवातरन्निशि ॥ ५९ ॥ शुज्रेऽह्नि तनयं देवी, प्रासूत शुज्रल्लक्षणं। सहस्ररश्मिं प्राचीव, जयदत्तं शची यथा ॥ ६० ॥ अर्ककीर्तिरिति ख्यातं पित्रा नाम विनिर्ममे। सुतस्य प्रेमपात्रस्य, चारुगात्रस्य संमदात् ॥ ६१ ॥ धात्रीज्ञिर्ल्लाल्ल्यमानोऽसौ, वृद्धिं प्राप दिने दिने। व्यधात्कल्लानां शौर्यादि—गुणानां च स संग्रहं ॥ ६२ ॥ क्रमाच्चक्रिपदं प्राप्य, मुक्त्वा राज्यं परं चिरं। जितशत्रुगुरोः पार्श्वे, प्रवव्राज सुधीनिधिः ॥ ६३ ॥ सुदुष्करं तपस्तप्त्वा, शुद्धां दीक्षां प्रपाल्य सः। काल्लं कृत्वाच्युतेंऽशेऽभूद्, द्वादशे त्रिदशाल्लये ॥ ६४ ॥ ततश्च्युत्वा महीनाथ, त्वमशोकाज्ञिधेऽज्ञवः। करुणादेकतपसः, स्नेहोऽस्ति युवयोर्मिथः ॥ ६५ ॥ स्वसुतानां सुंदरत्वे, कारणं शृणु भूपते। वदामि मथुरापुर्या—मग्निशर्मा द्विजोऽभवत् ॥ ६६ ॥ वज्रुवुर्नंदनास्तस्य, सप्त दारिद्र्यज्राजनं। ज्ञिक्षायै ल्लोकगेहेषु, ज्रमंति स्म निरंतरं ॥ ६७ ॥ अन्यदा पाटल्लीपुत्रे, पुरे ज्ञिक्षाकृते ययुः। ते सप्त नगरो-

द्याने, तस्युर्विश्रामहेतवे ॥ ६८ ॥ तेऽपश्यन् भूपतेः पुत्रा,—ञ्जानाज्ञरणभूषितान्। क्रीडतः क्रीडया कामं, सुरूपान् देवसन्निज्ञान् ॥६९॥ दृष्ट्वा हि क्रीडनं तेषा,—मर्चिति द्विजनंदनैः। अहो पुण्यफल्लं चित्त,—चमत्कारकरं महत् ॥७०॥ नूनमेज्ञिस्तपस्तप्तं, परं प्राचीनजन्मनि। यस्माज्जाजकुल्ले जन्म, ल्लब्धं रूपमनुत्तरं ॥७१॥ अकारि दुष्कृतं पूर्वं, नवेऽस्माज्जिर्यतोऽधुना। ल्लेज्ने हीनकुले जन्म, दारिद्र्योपद्भवः पुनः ॥७२॥ इति चिंताजुषां तेषां, मुनिर्दृग्गोचरं गतः। शुज्रोदयेन सज्ञक्त्या, स तैरागत्य वंदितः ॥७३॥ योग्यान् विज्ञाय विनया,—वनतांस्तान् दयापरः। धर्मोपदेशं प्रददौ, स वाचंयमपुंगवः ॥ ७४ ॥ धर्मः कल्पद्रुमः पुंसां, धर्मश्चिंतामणिः परः। धर्मएवापवर्गस्य, पारंपर्येण साधकः ॥ ७५ ॥ धर्मस्य जननी जीव,—दयैव गदिता जिनैः। सौज्ञाग्यारोग्यदीर्घायुः,—श्लाघादाने पटीयसी ॥ ७६ ॥ इति साधुमुखात् श्रुत्वा, श्रद्धाज्ञावितचेतसः। ते प्रपद्याहतं धर्म,—माराध्य च दिवं गताः ॥ ७७ ॥ ततश्च्युत्वा बज्रुवुस्ते, गुणपाल्लादयस्तव। सप्तापि ज्रूपते पुत्रा, रूपेण सुरसन्निज्राः ॥ ७८ ॥ अथाष्टमसुतस्याहं, वच्मि पूर्वज्रवं नृप। वैताढ्यशैले ज्ञिह्वांक,—पुरमासीत्पदं श्रियः ॥ ७९ ॥ तत्र विद्याधरो नाम्ना, चारुकीर्तिरज्रूत्पुरा। अर्हदर्चावंदनादि,—कृत्यं चक्रे चिरं सुधीः ८० ॥ सोंते समाधिना मृत्वा, स्वर्गं सौधर्ममासदत्। ततश्च्युतोऽभवद्ल्लोक, पाल्लाख्यस्ते सुतोऽष्टम : ॥८१॥ सान्निध्यं देवता तस्य, चकार पतनक्षणे। प्राक् शुज्राचीर्णतः सोऽयं, सुतोऽजायत ते नृप ॥ ८२ ॥ पुत्रीणामथ भूपाल्ल, प्राचीनसुकृतं शृणु। वैताढ्ये श्रीपुरे चित्र,—गतिर्विद्याधरोऽज्रवत् ॥ ८३ ॥ पुत्र्यश्चतस्रस्तस्यासन, रूपल्लावण्यराजिताः। जग्मुरन्येद्युरुद्यानं, क्रीडां ताः कर्तुमुद्यताः ॥८४॥ ज्ञानिनं च मुनिं तत्रा,—पश्यंस्ताः सुकृतोदयात्। साधुरप्यवदज्जद्रा, धर्म वित्थ विधत्थ च ॥ ८५ ॥ ऊचुस्ता न वयं विद्मः, सुकृतं कुर्महे न च। मुमुक्षुरवदत्स्तोक,—मायुर्वो वर्तते खलु ॥ ८६ ॥ जगुस्ताः

कियदस्माक,—मायुरस्ति प्रभो वद । अवक् साधुर्वासरेऽस्मिन् पंचत्वं वो भविष्यति ॥ ८७ ॥ तान्निः सर्वान्निरप्युक्तं, मुमुक्षो स्तोकवेलया । क्रियते धर्मकृत्यं किं, परलोकसुखावहं ॥ ८८ ॥ वाचंयमोऽप्युवाचैवं, वचनं शृणुतानघाः । विद्यतेऽद्य दिनं शुक्ल, पंचम्या अतिशोभनं ॥८९॥ ज्ञानस्याराधनं भक्त्या, क्रियतेऽद्यतने दिने । उपवासस्य च प्रत्या--ख्यानं सुगुरुसन्निधौ ॥ ९० ॥ अतो यूयं हि कुरुतो,—पवासं श्रद्धयान्विताः। सुखिन्यस्तपसानेन, भविष्यथ भवांतरे ॥ ९१ ॥ साधूदितं वचः श्रुत्वा, तत्तपः प्रतिपद्य ताः । अभिवंद्य गुरुं जग्मुः, स्वगृहं गतकल्मषाः ॥ ९२॥ ऊचुर्भर्तिकरं सर्वे, तं पितुः पुरतो हि ताः। तेनापि श्लाघिताः सत्यो, धन्यंमन्या मुदं दधुः ॥ ९३ ॥ स्थितास्ताः शुभभावेन, प्रपूज्य परमेश्वरं । विद्युत्पातेन तावच्च, मृत्वा जग्मुः सुराक्षयं ॥ ९४ ॥ ततश्च्युताः सुता आसन्, सुखिन्यस्तव भूपते । शुक्लैकपंचमीघस्र,—तपःप्राज्यप्रभावतः ॥ ९५ ॥ आसां मोक्षसुखं भावि, भवेऽस्मिन्नृशिरोमणे । किमिष्टं देहिनां न स्या,—त्तपसः श्रीजिनोदितात् ॥ ९६ ॥ निशम्येति वचः साधोः, प्रपद्य रोहिणीतपः । गुरुं प्रणम्य स्वगृहं, राजा राज्ञी च जग्मतुः ॥ ९७ ॥ तपश्चिरं समाराध्य, भुक्त्वा सौख्यं च दंपती । राज्यमुत्सृज्य सुगुरोः, पार्श्वे जगृहतुर्व्रतं ॥ ९८ ॥ कृत्वात्युग्रं तपः कर्म,—क्षयात्केवलमुज्ज्वलं । प्राप्य तौ दंपती मुक्तिं, जग्मतुर्दुःखवर्जितां ॥ ९९ ॥ रोहिण्यशोकयोर्वृत्तं, निशम्येति गुरूदितं । सततं क्रियतां भव्याः, प्रयत्नो रोहिणीतपे ॥ १०० ॥ श्रीमत्तपगणागगनां,—गणदिनमणिविजयसेनसूरीणां । शिष्याणुना कथेयं , विनिर्मिता कनककुशलेन ॥१॥ श्रीशांतिचंद्रवाचक,—विद्यागुरुमादरात्प्रणम्य मया । हयभूतरसेंदुमिते (१६७७), वर्षे दीपोत्सवे लिखिते ॥२॥ युग्मं ॥

॥ इति श्रीरोहिणीतपोमाहात्म्यविषये रोहिण्यशोकचंद्रकथा संपूर्णा ॥